प्रायश्चित्ततत्त्वम् ॥*॥ अथ वैधहिंसाविचारः। "मा हिंस्यात् सर्व्वा भूतानि इत्यत्र सर्व्वशब्दस्य व्यापकार्थपरतया एतद्विधिमनुल्लङ्घ्य वायव्यं श्वेतमालभेत। इत्यादिविधिविषयाप्राप्तिरगत्या वैधातिरिक्तविषयत्वम्। सर्व्वाः सर्व्वाणि छन्दसि वा इत्यनेन तत् पदं सिद्धम्। यदपि नानादर्शनटीकाकृद्भिर्व्वाचस्पतिमिश्रैस्तत्त्वकौमुद्यामभिहितम्। 'न च मा हिंस्यात् सर्व्वा भूतानि इति सामान्यशास्त्रं विशेषशास्त्रेण अग्नीषोमीयं पशुमालभेत इत्यनेन बाध्यते इति वाच्यं विरोधाभावात्। विरोधे हि बलीयसा दुर्ब्बलं बाध्यते। न चास्ति विरोधः भिन्नविषयत्वात्। तथा हि। मा हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरक्रत्वर्थत्वमपि। न चानर्थहेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति विरोधः। हिंसा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्च उपकरिष्यति' इत्यन्तेन। तदपि सांख्यनये। मीमांसकमते तु विरोध एव। तथा हि। गुरुनये न खलु सर्व्वभूतहिंसाभावविषयकं कार्य्यमिति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपश्वालम्भनविषयकं कार्य्यमिति भावविध्यर्थे उपपद्यते। भट्टनये तु अङ्गं यथा तथास्तु। न च सुख्यपशुयागे पुरुषार्थे पशुहिंसनस्यार्थसाधनत्वमनर्थ-साधनत्वञ्चोपपद्यते विरोधात्। वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव कुतः विधेरेव स्वभावो यः स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति। अन्यथा अङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियते। अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वं अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति। अतएवोक्तं तस्मादयज्ञे वधोऽवधः इति। नन्वेवं श्येनेनाभिचरन् यजेत इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवगतम्। अभिचारो मलकर्म्म च इति मनुना उपपातकगणमध्ये पाठादनिष्टसाधनत्वमवगतम्। तदेतत् कथमुपपद्यतामिति चेन्नैवम्। आततायिनमायान्तं हन्यादेवाविचारयन् इत्येकवाक्यतया आततायित्वे इष्टसाधनत्वं अनाततायित्वे तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोध इति। गुरुचरणा अप्येवम्।" इति तिथ्यादितत्त्वम्॥

वैधात्रः, पुं, (विधातुरपत्यं पुमान्। विधातृ+अण्।) सनत्कुमारः। स च विधातृपुत्रः। इत्यमरः॥

वैधात्री, स्त्री, (विधातुरियमिति। विधातृ+अण्। ङीप्।) ब्राह्मी। इति राजनिर्घण्टः॥ (विधातृसम्बन्धिनि, त्रि। यथा, राजतरङ्गिण्याम्। ४। ४१३।
"अभङ्गुरास्तेऽभिमानास्तस्यैवासन् मनस्विनः। अभ्यवर्त्तत येरेव वैधात्रीरपि वामताः॥")

वैधूमाग्नी, स्त्री, प्राच्यदेशीयनगरी। इति सिद्धान्तकौमुदी॥

वैधृतिः, पुं, विष्कम्भादिसप्तविंशतियोगान्तर्गतशेषयोगः। तस्य त्याज्यत्वं यथा,—
"परिघस्य त्यजेदर्द्धं सप्त शूले च नाडिकाः। गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः। वैधृतिव्यतिपातौ च समस्तौ परिवर्ज्जयेत्॥"
इति ज्योतिस्तत्त्वम्॥*॥
तत्र जातफलं यथा, कोष्ठीप्रदीपे।
"मैत्रीविहीनः कुटिलः खलश्च
मूर्खो दरिद्रः परवञ्चकश्च।
कुकर्म्मकर्त्ता परदारभर्त्ता
भवेन्नरो वैधृतिलब्धजन्मा॥"
अन्त्ययोगे तस्य वर्ज्यत्वमवर्ज्यत्वञ्च यथा,—
"यदि वृद्धियतीपातौ दिनं वाप्यशुभं भवेत्। हन्यतेऽन्त्ययोगेन भास्करेण तमो यथा॥ हन्त्यन्त्याख्यो योगः सर्व्वाण्यशुभानि हेलया नियतम्। न भवति पुनरिह शक्तो वैधृतिवृद्धियतीपाते॥"
इति ज्योतिस्तत्त्वम्॥
(देवताविशेषः। यथा, भागवते। ८।१।२८।
"देवा वैधृतयो नाम विधृतेस्तनया नृप। नष्टाः कालेन यैर्व्वेदा विधृताः स्वेन तेजसा॥")

वैधेयः, त्रि, (विधिं पद्धतिमेवानुसृत्य व्यवहरति। विधि+ढक्। यद्वा, विधेये कर्त्तव्ये अनभिज्ञः। विधेय+अण्। यद्वा, विरुद्धं धेयमस्य। ततः स्वार्थे अण्। पद्धतिमाश्रित्य क्रियाकारित्वात् युक्तायुक्तविवेकशून्यत्वाच्च तथात्वमस्य।) मूर्खः। इत्यमरः। ३। १। ४८। (यथा, राजतरङ्गिण्याम्। ६। १५६।
"पुंश्चली चाक्षवैधेयबालकान्दोलनिर्भरा। समभूदप्रवेशार्हा राजधर्म्ममनस्विनाम्॥")
विधिसम्बन्धी विधेयसम्बन्धी च॥

वैध्यतः, पुं, यमप्रतीहारः। इति हेमचन्द्रः॥

वैनतेयः, पुं, (विनताया अपत्यमिति। विनता+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) गरुड़ः। इत्यमरः॥ (यथा, देवीभागवते। २। १२। २९।
"समानीयामृतं मात्रे वैनतेयः समर्पयत्॥")
अरुणः। इति मत्स्यपुराणम्॥ (विनतापत्यमात्रे। यथा, महाभारते। १। ६५। ४०।
"तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुड़ारुणौ। आरुणिर्वारुणिश्चैव वैनतेयाः प्रकीर्त्तिताः॥")

वैनयिकः, पुं, युद्धाभ्यासरथः। तत्पर्य्यायः। योग्यरथः २। इति हेमचन्द्रः। ३। ४१६॥ (विनय एव। "विनयादिभ्यष्ठक्।" ५। ४। ३४। इति स्वार्थे ठक्। विनयः॥) विनयसम्बन्धिनि, त्रि॥ (यथा, महाभारते। १२। ६८। ४।
"मन्ये वैनयिकं कृत्वा विनयज्ञो दृढव्रतिम्। इक्ष्वाकुनन्दनो भूत्वा प्रणम्य विधिपूर्व्वकम्। विधिं पप्रच्छ राज्यस्य सर्व्वलोकहिते रतः॥")

वैनायिकः, पुं, बौद्धः। इति त्रिकाण्डशेषः॥ यथा,
"भिक्षुकः चपलोऽङ्गीको बौद्धो वैनायिकः स्मृतः॥"
इति त्रिकाण्डशेषः॥

वैनाशिकं, क्ली, (विनाशं सूचयतीति। विनाश+ठक्।) नाड़ीनक्षत्रविशेषः। स तु जन्मर्क्षावधित्रयोविंशनक्षत्रम्। यथा। जन्माद्यं कर्म्म ततोऽपि दशमं सांघातिकं षोड़शभम्। समुदयमष्टादशभं विनाशसंज्ञं त्रयोविंशं स्यात्तु पञ्चविंशं मानसमेवं नरः षड्भः स्यात्॥
तत्फलं यथा,—
"देहादेहार्थहानिः स्याज्जन्मर्क्षे उपतापिते। कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे॥ मूर्त्तिद्रविणबन्धूनां हानिः सांघातिके तथा। संतमे सामुदयिके मित्रभृत्यार्थसंक्षयः॥ वैनाशिके विनाशः स्यात् देहद्रविणसम्पदाम्॥"
इति ज्योतिस्तत्त्वम्॥
निधनतारा। यथा,—
"वैनाशिकर्क्षे दृष्टं ग्रहणं सुधांशुभास्करयोः। जनयति रोगं बहुधा क्षीणं वित्तक्षयञ्चाशु॥"
वैनाशिकर्क्षे त्रयोविंशनक्षत्रे। इति केचित्। वस्तुतस्तु वैनाशिकपदं निधनतारापरम्। निधनेऽपि चैतैकवाक्यत्वात्। इति तिथ्यादितत्त्वम्॥

वैनाशिकः, पुं, (विनाशो मतमस्य। विनाश+ठक्। सर्व्वं द्रव्यं क्षणिकमिति क्षणिकविज्ञानवादित्वादस्य तथात्वम्।) क्षणिकः। परतन्त्रः। ऊर्णनाभः। इति मेदिनी॥ विनाशसम्बन्धिनि, त्रि॥

वैनीतकः, पुं, क्ली, परम्परावाहनम्। इत्यमरः॥ आरूढ़ं वाह्यं यत् साक्षात् न वहति परम्परयैव वहति तद्वैनीतकम्। यथा दोलां वहन् दोलावाहकः विनीयते क्षेति क्तात् विकारसंघेति के विनीतकः तेनैव स्वार्थे ष्णि इड़ौ वैनीतकम्। इति भरतः॥ विनीतसम्बन्धिनि, त्रि॥

वैन्यः, पुं, (वेनस्यापत्यं पुमान्। वेन+"कुर्व्वादिभ्यो ण्यः।" ४। १। १५१। इति ण्यः।) वेनपुत्रः। स तु पृथुराजः। यथा,—
"वेनस्य मथिते पाणौ स बभूव महापुमान्। वैन्यो नाम महीपालो यः पृथुः परिकीर्त्तितः। येन दुग्धा मही पूर्व्वं प्रजानां हितकारणात्॥"
इति वह्निपुराणे वर्णाश्रमशासननामाध्यायः॥
(यथाच ऋग्वेदे। ८। ९। १०।
"पृथी यद्वां वैन्यः सादनेष्वेव।"
"वैन्यो वेनस्य पुत्रः पृथी एतत्संज्ञो राजर्षिः।"
इति तद्भाष्ये सायणः॥)

वैपरीत्यं, क्ली, (विपरीत+ष्यञ्।) विपरीतस्य भावः। तत्पर्य्यायः। व्यत्यासः २ विपर्य्यासः ३ विपर्य्ययः ४ व्यत्ययः ५। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये। ४२। ३४।
"स्वभाववैपरीत्यन्तु प्रकृतेश्च विपर्य्ययः॥")

वैपरीत्यलज्जालुः, स्त्री, पुं, (वैपरीत्या लज्जालुः।) स्वल्पक्षुपरक्तपुष्पफला लज्जालुः। यथा,—
"लज्जालुर्व्वैपरीत्याख्या स्वल्पक्षुपरक्तपुष्पफला। वैपरीत्या च लज्जालुर्ह्यभिधाने प्रयोजयेत्॥ लज्जालुर्व्वैपरीत्याख्यः कटुरुष्णः कषायभृत्। रसे नियामकश्चैव नानाविज्ञानकारकः॥"
इति राजनिर्घण्टः॥